एव "कुर्य्यात् घृतपशुं सङ्गे कुर्य्यात् पिष्टपशुं तथे"त्यनेन सति सङ्गे (यज्ञादिफलकामनायाम्) पिष्टपशुनैव तं सम्पादयेदिति तेनैवोक्तम् अधिकं पिष्टपशुशब्दे वक्ष्यते। रोगिणा भक्षणेऽपि विशेषः "ब्राह्मणानुज्ञया भक्ष्यमुक्तं मांसञ्च रोगिभिः। मातापितृभ्यां संभुक्तं शेषं वा ब्रह्मचारिणः पुनः प्रशान्तरोगेण कर्त्तव्यमधिकं व्रतम्" ब्रह्मपु०। "अगम्यागमने चैव मद्यगोमांसभक्षणे शुद्ध्यै चान्द्रायणं कुर्य्यात् पराश० "गामश्वं कुञ्जरोष्ट्रौ च सर्व्वान् पञ्चनखांस्तथा। क्रव्यादं कुक्कुटं ग्राम्यम् भुक्त्वा संवत्सरं व्रतम्" शङ्खः। पञ्चनखाश्च शशादिभिन्नाः। "शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहुरिति मनूक्तेः। "विड्वराहग्रामकुक्कुटनरगोमांसभक्षणेषु सर्व्वेष्वेव द्विजानां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यात्" विष्णुः "हंसं मद्गूंञ्च काकोलं काकं वा खञ्जरीटकम्। मत्स्यादांश्च तथा मत्स्यान् बलाकां शुकसारिके। चक्रवाकं प्लवं कौलं मण्डूकं भुजगं तथा। मासमेकं व्रतं कुर्य्यात् भूयश्च तन्न भक्षयेदिति शङ्खः। मत्स्यादः पाठीनव्यतिरिक्तः "पाठीनरोहिताबाद्यौ नियुक्तौ दैवपैत्रयोः" मनुना तस्य विधानात्। "कलविङ्कहंसमद्गुचक्रवाकरज्जुबालसारसदात्यूहशुकसारिकाभासचाषकाकशलाकाकोकिलखञ्जरीटाशने त्रिरात्रमुपवसेत्" विष्णुः। "चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्" मनुः। सूना बध्यस्थानं तत्र भवत् सौनम् वल्लूरं शुष्कमांसम्। "क्रव्यादान् शकुनीन् सर्व्वान् टिट्टिभञ्च विवर्ज्जयेत् कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम् सारसं रज्जुबालञ्च दात्यूहं शुकसारिके। प्रतुदान् जालपादांश्च क्रौञ्चांश्च नख विष्किरान्। निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम् मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्व्वशः" इति मनुः। मत्स्यभेदे दैवादाववादमाह मनुः "पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः। राजीवसिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः" "अभक्ष्यं भक्ष्येष्वजामहिषीक्षीरं विवर्जयेत् पञ्चनखमत्स्यवराहमांसानि" चेति विष्णुः। "मत्स्यकर्कटशम्बूकशङ्खशुक्तिकपर्द्दकान् पीत्वा नवोदकञ्चैव पञ्चगव्येन शुध्यति" हारी० "कृमिकीटपिपीलिकाजलौकापतङ्गास्थिप्राशने गोमूत्रगोमयाहारस्त्रिरात्रेण प्रयतो भवेत्" हारी० केशमक्षिकारुधिरप्राशने आममांसकृमिभक्षणे इत्युपक्रम्य "त्रिरात्रोपवासं घृतप्राशनञ्च कुर्य्यात्" शङ्खलि०। "भक्ष्याणामप्याममांसरुधिरप्राशने तु पञ्चगव्यम्" हारी०। "नखकेशरुधिरप्राशने सद्यः स्नानं घृतकुशहिरण्योदकप्राशनञ्च" बुधः "अजाविकमहिषमृगाणाम् मांसभक्षणे केशरुधिरप्राशने च बुद्धिपूर्व्वे त्रिरात्रम्" बौधा० भक्ष्यमांसकस्यापि क्वचिदंशे निषिद्धता "पृष्ठमांसं गर्भशय्यां शुष्कमांसमथापि वा। भूमेरन्तर्गतं कृत्वा त्वङ्निस्रागालितं च यत्। पक्वं मांसमृजीषन्तु प्रयत्नान्न च भक्षयेत्। प्रमादभक्षितैरेभिर्वने वासं वसेदहः" ब्र०पु०। ऋजीषं पिष्टपचनभाण्डं तत्र पक्वम्। व्यक्तिविशेषे सर्व्वमांसानामभक्ष्यता "न भक्ष्यं यतिना मांसं कदाचित्तु मुमूर्षुणा" ब्र०पु०। स्त्रीणान्तु सर्व्वथा मांसनिषेधमाह भागवतम् "ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशवः इह ये निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनावदायासृक् पिबन्ति" इति। कार्त्तिकादौ तु सर्व्वथा मांसादिनिषेधः। "न मत्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि। चण्डालो जायते राजन्! कार्त्तिके मांसभक्षणात्" आ०त०ना०पु०। "कौसुदन्तु विशेषेण शुक्लपक्षं नराधिप!। वर्ज्जयेत् सर्व्वमांसानि धर्म्मस्तत्र विधीयते। एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु" इत्युपक्रम्य वर्ज्जितव्या तथा हिंसा मांसभक्षणमेव च ब्रह्मपु०। "निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने यो भक्षयति राजेन्द्र! चण्डालादधिकोहि सः। कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत्। निष्पावान् मुनिशार्दूल। यावदाहूतनारकी। कदम्बानि पटोलानि वृन्ताकसहितानि च। न त्यजन् कार्त्तिके मासे यावदाहूतनारकी। एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने। शतजन्मार्जितं पुण्यं दहते नात्र संशयः" म०त०ब्रह्मपु०। निष्पावः श्वेतशिम्बी। कदम्बानि कदम्बफलानीति कलम्बीति वा म०त० रघु०। तिथिविशेषेषु मांसादीनामभक्ष्यता "स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु मानवः विण्मूत्रभोजनं नाम नरकं प्रतिपद्यते" इति वि०पु०। "षष्ठ्यष्टमी पञ्चदशी उभे पक्षे चतुर्द्दशी। अत्र सन्निहितं पापं तैले मांसे भगे क्षुरे" स्मृतिः "मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन। केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः। भ्रूणघ्नावेक्षितं चैव संस्पृष्टञ्चाप्युदक्यया। पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च। गवा चान्नमुपाघ्रातं घुष्टान्नञ्च विशेषतः। गणान्नं गणिकान्नञ्च विदुषा च जुगुप्सितम्। स्तेनगाय-